

# Sri Lakshmi Stotram – Venkatachala Mahatmya – Skanda Puranam

## ॥ श्रीलक्ष्मी स्तोत्रं - श्रीस्कन्द पुराणम् ॥

This following is a rare hymn on **Goddess Lakshmi** from **Sri Skanda Purana, Vaishnava Khanda, Venkatachala Mahatmya, Chapter 9**.

The short **Phalashruti** mentions that one who chants this prayer attains the four Purusharthas (Dharma, Artha, Kama, Moksha), long life, knowledge, progeny, etc. and attains Moksha in the end after enjoying these benefits in this life.

देवा ऊचुः -

नमः श्रियै लोकधात्र्यै ब्रह्ममात्रे नमो नमः ।
नमस्ते पद्मनेत्रायै पद्ममुख्यै नमो नमः ॥ १ ॥

प्रसन्न मुख पद्मायै पद्मकान्त्यै नमो नमः ।
नमो बिल्व वनस्थायै विष्णु पत्न्यै नमो नमः ॥ २ ॥

विचित्र क्षोम धारिण्यै पृथु श्रोण्यै नमो नमः ।
पक्व बिल्व फला पीन तुङ्ग स्तन्यै नमो नमः ॥ ३ ॥

सुरक्त पद्म पत्राभ कर पाद तले शुभे ।
सुरत्नाङ्गद केयूर काञ्ची नूपुर शोभिते ॥ ४ ॥

यक्ष कर्दम संल्लिप्त सर्वाङ्गे कटकोज्ज्वले ॥ ५ ॥

माङ्गल्याभरणैश् चित्रैर् मुक्ताहारैर् विभूषिते ।
ताटङ्कैरवतंसैश् च शोभमान मुखाम्भुजे ॥ ६ ॥

पद्महस्ते नमस्तुभ्यं प्रसीद हरि वल्लभे ।
ऋग् यजुस् साम रूपायै विद्यायै ते नमो नमः ॥ ७ ॥

प्रसीदास्मान् कृपा दृष्टि पातैरालोकया ऽ ब्धिजे ।
ये दृष्टास्ते त्वया ब्रह्म रुद्रेन्द्र त्वं समाप्नुयुः ॥ ८ ॥

श्रीशुक उवाच -

इति स्तुता सदा देवैर् विष्णु वक्षः स्थलालया ।
विष्णुना सह संदृश्या रमा प्रीता ऽ वदत् सुरान् ॥ ९ ॥

श्रीरुवाच -

सुरारीन् सहसा हत्वा स्वपदानि गमिष्यथ ।
ये स्थानहीनाः स्वस्थानाद् भ्रंशिता ये नरा भुवि ॥ १० ॥

ते मां अनेन स्तोत्रेण स्तुत्वा स्थानं अवाप्नुयुः ।
अखण्डैर् बिल्व पत्रैर् मां अर्चयन्ति नरा भुवि ॥ ११ ॥

स्तोत्रेणा ऽ नेन ये देवा नरा युष्मत् कृतेन वै ।
धर्मार्थ काम मोक्षाणामाकरास्ते भवन्ति वै ॥ १२ ॥

इदं पद्मसरो देवा ये केचन नरा भुवि ।
प्राप्य स्नानं करिष्यन्ति मां स्तुत्वा विष्णु वल्लभाम् ॥ १३ ॥

तेऽपि श्रियं दीर्घमायुर् विद्यां पुत्रान् सुवर्चसः ।
लब्ध्वा भोगांश् च भुक्तवा ऽ न्ते नरा मोक्षं अवाप्नुयुः ॥ १३ ॥

इति दत्त्वा वरं देवी देवेन सह विष्णुना ।
आरुह्य गरुडेशानं वैकुण्ठ स्थानमाययौ ॥ १४ ॥

---

**॥ इति श्रीस्कान्दे महापुराणे एकाशीति साहस्र्यां संहितायां वैष्णव खण्डे श्रीवेङ्कटाचल माहात्म्ये श्रीलक्ष्मी स्तोत्रं सम्पूर्णम् ॥**